
सप्तमः पाठः

# ऐक्यबलम्

कस्मिंश्चित् वने निम्बवृक्षे एकं चटकायुगलं प्रतिवसति स्म। समये चटकया अण्डानि दत्तानि, युगलम् अति प्रसन्नम् आसीत्। एकस्मिन् दिने आतपपीड़ितः एकः मदमत्तः गजः तत्र आगतः। मदेन सः तस्य वृक्षस्य तां शाखां नाशितवान् यस्यां शाखायां चटकायाः अण्डानि आसन्। अतः अण्डानि अपि नष्टानि। चटकायुगलं कातरक्रन्दनम् आरब्धवत्। रोदनं श्रुत्वा तयोः मित्रं काष्ठभेदकः पक्षी आगतः। सः उक्तवान्— रोदनेन अलम्। तेन उक्तं ''सः एव बुद्धिमान् यः मृतं गतं च न चिन्तयति।'' चटका तम् अवदत्, ''एषः मत्तगजः हन्तव्यः अन्यथा एषः सर्वान् पशुपक्षिपादपान् नाशयिष्यति।'' काष्ठभेदकः अवदत्–अहं स्वमित्रं मक्षिकाम् आनयामि कदाचित् सा गजं हन्तुम् उपायं चिन्तयेत्।

सः गत्वा मक्षिकां न्यवेदयत् यत्–मम चटकामित्रस्य गृहम् एकेन मत्तगजेन विनष्टम्। तस्य वधाय सहायतां करोतु। मक्षिका अवदत्– ''यत् मित्रम् एव मित्रस्य कार्यं साधयति। मक्षिका तदा स्वमित्रं चतुरमण्डूकम् उपायं पृष्टवती। मण्डूकः उक्तवान्– एकीभूता दुर्बलाः अपि सबलं शत्रुं हन्तुं शक्नुवन्ति। तैः सर्वैः मिलित्वा एका योजना निश्चिता। सर्वेषां दायित्वं वितरितं तदनुसारं मध्याह्ने मक्षिकया गजस्य कर्णयोः वीणावादनं कृतम्। एतेन गजः नयने निमील्य वीणावादनेन मुग्धः अभवत्। तावत् एव काष्ठभेदकः तस्य नयने चञ्चुप्रहारेण व्यनाशयत्। अनन्तरं यत्र महान् पङ्कः आसीत् तत्र मण्डूकः ध्वनिना तं जलं पातुम् आकर्षितवान्। अन्धः गजः तस्मिन् पङ्के पतितः मृतश्च।



एवं तैः तीक्ष्णबुद्ध्या ऐक्येन च सः मत्तगजः मारितः। आत्मनो वनस्य च रक्षणं कृतम्।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| आतपपीडितः | — | धूप से दु:खित | कातरक्रन्दनम् | — | करुण रोदन |
| निम्बवृक्षे | — | नीम के पेड़ पर | मक्षिका | — | मक्खी |
| चटकायुगलम् | — | चिड़ियों का जोड़ा (नर-मादा) | एकीभूताः | — | एकत्र होकर |
| | | | सबलम् | — | बलशाली को |
| काष्ठभेदकः | — | कठफोड़वा नाम का पक्षी | निमील्य | — | बन्दकर |
| मत्तगजः | — | मतवाला हाथी | तीक्ष्णबुद्ध्या | — | तेज बुद्धि के द्वारा |
| चतुरमण्डूकम् | — | होशियार मेंढक से/को | वीणावादनेन मुग्धः | — | वीणा वादन से मोहित हुआ |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत—**

क. चटकायुगलं कुत्र प्रतिवसति स्म?

ख. गजः कां नाशितवान्?

ग. चटकायुगलस्य रोदनं श्रुत्वा कः आगतः?

घ. काष्ठभेदकः काम् आनीतवान्?

ङ जलं पातुं गजं कः आकर्षितवान्?

**2. एकवाक्येन उत्तरं लिखत—**

क. बुद्धिमान् कः अस्ति?

ख. मित्रस्य कार्यं कः साधयति?

ग. मण्डूकः मक्षिकां किम् उपायम् उक्तवान्?

घ. मक्षिका गजस्य कर्णयोः किं कृतवती?

ङ ते मत्तगजं केन बलेन मारितः?

**3. युग्मनिर्माणं कुरुत—**

| | (अ) | | (ब) |
|---|---|---|---|
| क. | ऐक्यबलेन | — | चञ्चुप्रहारम् |
| ख. | बुद्धिमान् | — | वीणावादनम् |
| ग. | काष्ठभेदकः | — | कातरक्रन्दनम् |
| घ. | मक्षिका | — | मत्तगजः मारितः |
| ङ. | चटकायुगलम् | — | यः गतं मृतं च न चिन्तयति |

4. **रिक्तस्थानानि पूरयत—**

क. निम्बवृक्षे एकं ................ प्रतिवसति स्म।

ख. चटकायुगलं ..................... आरब्धवत्।

ग. मक्षिका स्वमित्रम् ................. पृष्टवती।

घ. मत्तगजः ................. पतितः।

ङ ते ................. मत्तगजं मारितवन्तः

5. **एकताविषये पञ्चवाक्यानि लिखत—**

क. ..........................................।

ख. ..........................................।

ग. ...........................................।

घ. ..........................................।

ङ ..........................................।

6. **पाठे आगतानां जीवानां नामानि परस्परं सम्बन्धं च लिखत—**

.......................................................................................................................

.......................................................................................................................

.......................................................................................................................

.......................................................................................................................

.......................................................................................................................

**योग्यताविस्तारः —**

- एवमेव कामपि एकां कथां लिखत।

*संहतिः कार्यसाधिका।*